# Collection of six Dramas of Vatsaraja.pdf/३४



Exported from Wikisource on २१ अगस्तमासः २०२४

एतत् पृष्ठम् परिष्कृतम् अस्ति



अथवा । अलं मे खलालापसमाधाननिर्वन्धेन । तदहमिदानीमजितार्थतीर्थप्रतिपादनाय दुरोदरशालामेव व्रजामि ।

यतः-

घूतक्रीडाविहीनस्य वेश्यासु विमुखस्य च ।
विद्यमानमपि व्यक्तं धनं स्वप्नधनोपमम् ॥ ८ ॥

( आकाशे )

वयस्य चन्दनक !तिष्ट तिष्ट । मामपि प्रतिपालय। क्रिमात्थ ?सत्तट्टवासराइं दुरोदरविरहिणो ण तुह मुहं पुलोईअदि[1] । ( सस्मितम्) अलं मे वित्तशन्यस्य दोपोड्गावनेन । वित्तशाठ्यं हि क्रमातिक्रमे गर्हितम् । किं व्रवोपि ? । वि[2]लासवदीदिन्नहिअअस्स ण किंपि ते पडिहाअदि । (विहस्य ) विदितोऽस्मि वयस्येन । एवमेवैतत् ।

अहरहरभुता अप्यपूर्वापमाणा
निरुपधिमधुरास्ना: सुभ्रुव: प्रेमलीला: ।
कृननिविटसमाधिर्भावयन्नन्तरात्मा
परिशिथिलितवृत्तिर्वर्त्ततेऽन्यक्रियासु ॥ ९ ॥

( इति स्थित एव पठति )

( आफाशे कर्णे दत्वा )

एयं मे वयस्यो व्रवीति । सुट्ठु खु मे कोऊहल्लताओप्पेम्मलीलाओ आअण्णिदुं, जाहिं सअलभुअणमोहण्णो तुमंपि मोहि[3]दो । ( सत्रीडस्मितम् ) कथयामि यदि न सुभगम्मन्यं मन्यते वयस्यः । एकदा मयि केलिकलहान्तरिते सुगुप्तं सौधपृष्ठाचलग्ने अरतिभरनिरस्तनिद्रया तया गाथा पठिता । सेयमुत्कीर्णेव मनसि वर्त्तते ।

अ[4]ग्वइ ण तत्थ धुत्ते वावारो कोवि इअरदूईण ।
आणेसु सिविणए तं मा णिद्दे णिद्दया होहि ॥

( इयासीनस्तथा तथा अरतिं नाटयति )

---

1. ↑सप्ताष्टवासराणि दुरोदरविरहिणो न तम मुरयं प्रलोक्यते ।
2. ↑विलासनतीइदयस्य न किमपि ते प्रतिभाति ।
3. ↑मुघु खलु मे कुतूहलं ताः प्रेमलीला आकर्णयितुं, याभिः सकलमुपनमोहनस्त्त्वमपि मोहितः ।
4. ↑अर्हति न तन धृर्ते व्यापारः कोऽपि इतरदूतीनाम् ।

# About this digital edition

This e-book comes from the online library Wikisource[1]. This multilingual digital library, built by volunteers, is committed to developing a free accessible collection of publications of every kind: novels, poems, magazines, letters...

We distribute our books for free, starting from works not copyrighted or published under a free license. You are free to use our e-books for any purpose (including commercial exploitation), under the terms of the Creative Commons Attribution-ShareAlike 3.0 Unported[2] license or, at your choice, those of the GNU FDL[3].

Wikisource is constantly looking for new members. During the realization of this book, it's possible that we made some errors. You can report them at this page[4].

The following users contributed to this book:

- Swaminathan sitapathi
- Wikisource-bot

---

1. ↑ https://wikisource.org
2. ↑ https://www.creativecommons.org/licenses/by-sa/3.0
3. ↑ https://www.gnu.org/copyleft/fdl.html
4. ↑ https://wikisource.org/wiki/Wikisource:Scriptorium